दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

■ पृष्ठ-07 ■ वर्ष-5 ■ अङ्क-332 | 1 | सितम्बर 21, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**
वि.सं. २०८३,
कलियुगाब्धः ५१२७ शरद्-ऋतुः
सूर्यः दक्षिणायनम् भाद्रपदशुक्लदशमी
आश्विन् 05 प्रविष्टांशः मङ्गलमयः भवेत्

2 एशियन -क्रीडासु भारतस्य रजतध्वजं समुच्छ्राययन्तीं इलावेनिल-वालारिवन् इत्येतां राष्ट्रपतिः प्रधानमन्त्री च अभ्यनन्दताम्

4 वर्षाभारद्वाजमहोदयाया: मार्गदर्शने दुगड्डाखण्डे संस्कृतस्पर्धाः सम्पत्स्यन्ते दुगड्डाखण्ड, स्तरीयाः संस्कृतस्पर्धाः २३,२४ सितम्बर २०२६ दिनांके समायोज्यन्ते

7 हिमाचलस्य आयुर्विज्ञान-महाविद्यालयेषु प्रारप्स्यन्ते 'उत्कृष्टता-केन्द्राणि गम्भीर-रोगाणाम् उपचारः प्रदेशे एव भविष्यति

## सद्यो जाताः प्राकृतिक-आपदः सुदृढ-जलवायु-कार्याचरणाय अस्मान् प्रेरयन्ति – राष्ट्रपतिः मुर्मू



राष्ट्रपतिः द्रौपदीमुर्मुः उक्तवती यत् सद्य एव जातैः बहुभिः प्राकृतिकापद्भिः स्पष्टं जातं यत् जलवायुपरिवर्तनानां प्रभावान् न्यूनीकर्तुं सुदृढा जलवायुकार्ययोजना अत्यावश्यकी अस्ति। नवदेहल्याम् आयोजितस्य 'पर्यावरणस्य जलवायुगतिशीलतायाश्च भविष्यः' इत्यस्य सम्मेलनस्य समापनसत्रं सम्बोधयन्ती राष्ट्रपतिः उक्तवती यत् वैश्विकवैज्ञानिकसमुदायेन सञ्चेतना प्रदत्ता अस्ति यत् जलवायुसम्बद्धं सङ्कटम् अधुना अत्यन्तं गभीरं जातम् अस्ति। सा समस्यायाः निवारणाय समाधानाय च स्थानीय-प्रादेशिक-वैश्विकेषु सर्वेषु स्तरेषु सम्बद्धपक्षाणां मध्ये सक्रियसहकार्यं सुदृढीकर्तुं बलं दत्तवती।

## अद्यतनीयं सुभाषितम्

**पुण्यस्य फलमिच्छन्ति पुण्यं नेच्छन्ति मानवा:।**
**फलं पापस्य नेच्छन्ति पापं कुर्वन्ति यत्नतः।।**

भावार्थ:- मनुष्य पुण्य के फल की तो इच्छा करते हैं, परन्तु स्वयं पुण्य कर्म करना नहीं चाहते। पाप के फल को नहीं चाहते, फिर भी पाप कर्म करने का प्रयत्न करते रहते हैं।

हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता १००₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263
कार्यालयः, हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११ कार्यालीयः सम्पर्कः- शिवानी शर्मा 7876636263
सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति
संपादकगणः- डॉ.अमनदीपशर्मा, डॉ.मनोज शैलः, डॉ.अमित शर्मा, डॉ.नरेन्द्रराणा,
प्रचारगणः- जगदीश डाभी, शिवा शर्मा, वत्सदेसराजः, डॉ.पद्मनाभः, डॉ.अभिषेकशर्मा

## देशे युववर्गेभ्यः

### मादकद्रव्यमुक्तये 'राष्ट्रीय-सङ्कल्प-समारोहः' आयोज्यते




युव-शक्तिं मादक द्रव्येभ्यः रक्षितुं सर्वकारः शतसप्ताहात्मकं-महा-अभियानम् अनुकल्पया-मास । युवा-मन्त्रालयेन सप्तषडोत्तरैकसहस्र स्थानेषु सङ्कल्प-समारोहस्य सञ्चालनं विधीयते। मन्त्रालयेन अभिहितं यत् एषः कार्यक्रमः एकसप्तत्युत्तरचतुःशत मण्डलीयेषु 'माय-भारत' कार्यालयेषु, तथा समन्वित-संस्थानां षण्णवत्युत्तर-पञ्चशत स्थानेषु समायोज्यते। अस्य समारोहस्य मुख्यं लक्ष्यम् मादकद्रव्यमुक्त-शपथ-ग्रहणेन, हस्ताक्षर-अभियानेन, विषयाधारित-पथ-नाट्यैः, वाक्य-लेखनेन, युवा-नेतृत्व-संवादैश्च सन्देशम् अव्यवहित-रूपेण युव-जन-पर्यन्तम् प्रापणम् अस्ति । पञ्जाबस्य युववर्ग मादक-व्यसनात् मोचयितुम् मन्त्री अर्जुनराम-मेघवालः मादकद्रव्यमुक्त-यात्रायाः तृतीय-पूर्तिमण्डलं उद्घाटितवान् । आसफवालास्मारके असौ एकसप्तत्युत्तरनवदशशततमवर्षस्य हुतिंगतेभ्यः वीरभटेभ्यः श्रद्धाञ्जलिम् अददात्। अत्रान्तरे वार्ताहरान् सम्बोधयन् मन्त्रिणा प्रतिपादितं यत् एषा यात्रा न हि राजनीति-प्रेरिता, अपितु लोक-सङ्ग्रहाय प्रवर्तिता अस्ति ।



## गगने स्वकीय-कौशलं दर्शयत् सूर्यकिरण-दलं

### मेरठे सर्वान् व्यामोहितम् अकरोत्

गगने स्वकीय-कौशलं दर्शयत् सूर्यकिरण-दलं मेरठे सर्वान् व्यामोहितम् अकरोत् । रक्षा-राज्यमन्त्री सञ्जय सेठः एतां विमानलीलां अपश्यत्। असौ न्यगादीत् यत् वायुसेनायाः अनुशासनं शौर्यञ्च एतेन प्रतिफलति। दलेन त्रिंशत् वर्षेषु अधिकानि प्रदर्शनानि कृतानि सन्ति । अस्य दलस्य विमानैः ह्यः आरभ्य गगन-तलं स्वकीये वशे कृत्य विस्मयकारि-अन्तरिक्ष-कौशलेन दर्शकान् मन्त्रमुग्धान् अकारि। रक्षा मन्त्रालयेन संसूचितं यत् दिनद्वयात्मक-अवधौ छात्रान्, एन.सी.सी. कैडेट्स, एन.एस.एस.-स्वयंसेवकांश्च मेलयित्वा लक्षाधिकैः जनैः अस्य गगन-प्रदर्शनस्य आयोजनं कृतम्। सामाजिक-माध्यमे स्वकीय-लेखने मन्त्रिणा सञ्जय सेठेन एषः कार्यक्रमः अनुशासनस्य, परिशुद्धः, सामूहिक-समन्वयस्य, व्यावसायिकतायाश्च सङ्गमः तथा भारतीय-वायुसेनायाः गौरवमयी-क्षमतायाः प्रत्यक्षं प्रामाण्यम् इति अभिहितम्। मन्त्रिणा अस्य दलस्य शौर्यं समर्पणं च भूरिशः प्रशंसितम्, येन स्वकीयायां त्रिंशद्वर्षीयायाम आनुपूर्विक-यात्रायाम् भारते विदेशेषु च अष्टशताधिकेषु गगन-प्रदर्शनेषु कौशलं दर्शितम् अस्ति ।

## केन्द्रीयमन्त्रिणौ जी. किशन रेड्डी, एल. मुरुगन च तिरुमलास्थिते प्रसिद्धे श्रीवेंकटेश्वरमन्दिरे पूजा-अर्चनाम् कृतवन्तौ



केन्द्रीयमन्त्रिणौ जी. किशन रेड्डी, एल. मुरुगन च तिरुमलास्थिते प्रसिद्धे श्रीवेंकटेश्वरमन्दिरे पूजा-अर्चनाम् कृतवन्तौवार्ताहरैः सह सम्भाषणं कुर्वन् मन्त्री श्री रेड्डी अवदत् यत् तिरुमलातिरुपतिदेवस्थानम् वार्षिकब्रह्मोत्सवार्थम् व्यापकल्याणकारीणां व्यवस्थहानां निर्माणं कुर्वन् वर्तते। तेन देशे अल-नीनो-प्रभावकारणात् जायमानायाः न्यूनवृष्टेः परिप्रेक्ष्ये देशे सुवृष्ट्यै समृद्ध्ये च भगवान् वेंकटेश्वरः प्रार्थितः।केन्द्रीयमन्त्री एल. मुरुगनः अवदत् यत् सार्वजनिकसेवायाः पंचविंशतिवर्षाणि पूर्णानि कृत्वा प्रधानमन्त्रिणः नरेन्द्रमोदिनः कृते भगवान् वेंकटेश्वरस्य आशीर्वादः याचतः, यथा प्रधानमन्त्रिणे जनतायाः सेवायै भारतं च विश्वे अग्रणीस्थाने स्थापयितुम् अधिका शक्तिः प्राप्येत्।

# एशियन गेम्स इति क्रीडासु भारतस्य रजतध्वजं समुच्छ्राययन्तीं इलावेनिल-वालारिवन् इत्येतां राष्ट्रपतिः प्रधानमन्त्री च अभ्यनन्दताम्



हिमसंस्कृतवार्ता।
एशियन गेम्स-क्रीडासु भारतस्य रजतध्वजं समुच्छ्राययन्तीं इलावेनिल-वालारिवन् इत्येतां राष्ट्रपतिः प्रधानमन्त्री च अभ्यनन्दताम् । सामाजिक-माध्यमे स्वकीय-सन्देशे राष्ट्रपतिना प्रोक्तं यत् वालारिवन् इत्यस्याः एतेन उन्नत-प्रदर्शनेन राष्ट्रस्य मान-प्रतिष्ठा संवर्धिता । तया क्रीडिकायै, भविष्ये अधिक-समुन्नत्यै मङ्गल-कामनाः प्रकटीकृताः। प्रधानमन्त्रिणा सविशेषं उक्तं यत् एतत् तस्याः एकस्मिन्नेव दिने द्वितीयम् पदकम् अस्ति, येन अस्य विजयस्य महत्त्वं द्विगुणीभूतम् । अपरञ्च राष्ट्रपतिः प्रधानमन्त्री च दश-मीटर-एयर-राइफल-सामूहिक-स्पर्धायां रजत पदकं जित्वा भारतस्य पदककोषं समुद्घाटनं कुर्वते भारतीय-महिला-दलाय अपि शुभाशयान् अयच्छताम्। राष्ट्रपति-मुर्मु इत्यनया प्रोक्तं यत् इलावेनिल-वालारिवन्, विदिशा-के-विनोद्, तथा सोनम-उत्तम-मास्कर इत्येतासां एषा प्रशंसनीया उपलब्धिः राष्ट्राय महन्तं गौरवम् आनयति । प्रधानमन्त्रिणा मोदिना सप्रश्रयं उक्तं यत् कठोर परिश्रमः तथा सामूहिकसमन्वयभावः अस्य सिद्धः अनन्यथासिद्धं कारणं समजनि, यच्च आगामि-काले अन्यान् क्रीडकान् अपि निरन्तरं प्रेरयिष्यति। गृहमन्त्री अमितशाहोपि अभिनन्दनानि प्रेषितवान्। केन्द्रीयगृहमन्त्री अमितशाहः ऐषमः एशियाक्रीडामहोत्सवे महिला-दशमीटर्-मितायां राइफल्-दलस्पर्धायां रजतपदकं विजितवत्यः एलावेनिल-वलारिवन्, सोनम-उत्तम-मस्कर तथा विदर्शा के. विनोद् इत्येताभ्यः क्रीडिकाभ्यः अभिनन्दनानि प्रेषितवान्। सामाजिक-सञ्चार-पटले प्रकाशिते एकस्मिन् सन्देशे श्रीशाहः उक्तवान् यत् भारतेन रजतपदकविजयेन सह एशियाक्रीडासु स्वकीयस्य पदकाभियानस्य शुभारम्भः कृतः।

# भारतीय-वायुसेना जापान-देशेन सह 'वीर गार्डियन्' अभ्यासं सञ्चालयति



जोधपुरे वायु-सुरक्षां संवर्धयन्ती भारतीय वायुसेना जापान-देशेन सह 'वीर गार्डियन्' अभ्यासं सञ्चालयति। मङ्गलवासरे समाप्यमाणे अस्मिन् अभ्यासे तेजस्-राफेल-प्रभृतीनि विमानानि नभसि कौशलं दर्शयन्ति। एतेन युद्धाभ्यासेन द्वयोः राष्ट्रयोः मैत्री-सम्बन्धः प्रबलताम् एति।

# केन्द्रीयक्रीडामन्त्री जापानदेशे भारतीयप्रवासिसमुदायस्य सदस्यैः सह विशेषे “संडेज-ऑन-साइकिल” इति द्विचक्रिकायात्रा-कार्यक्रमे सहभागं कृतवान्




केन्द्रीयक्रीडामन्त्री मनसुखमाण्डविया जापानदेशे भारतीयप्रवासिसमुदायस्य सदस्यैः सह विशेषे “संडेज-ऑन-साइकिल” इति द्विचक्रिकायात्रा-कार्यक्रमे सहभागं कृतवान् । भारतीयदलस्य क्रीडकानाम् उत्साहवर्धनाय अयं कार्यक्रमः आयोजितः आसीत्। श्रीमाण्डविया भारतस्य क्रीडकानां समर्थनाय जापानदेशे निवसित-भारतीय-प्रवासिसमुदायस्य प्रशंसां कृतवान् ।

# मुम्बईनगरे विद्युदाघातः, द्वयोः जनयोः मृत्युः, चत्वारश्च अन्ये जनाः व्रणिताः



मुम्बईनगरे कलाचौकी-क्षेत्रे गणेशोत्सवमण्डलस्य समीपे अस्थायि-पेयजलकेन्द्रे विद्युदाघातेन द्वयोः जनयोः मृत्युः अभवत्, चत्वारश्च अन्ये जनाः व्रणिताः। व्रणिताः समीपस्थेषु चिकित्सालयेषु प्रवेशिताः । तेषु एकस्य अवस्था गभीरा इति सूचिता, तत्रैव त्रयाणां च अवस्था स्थिरा । सहैव, राज्ये एकस्मिन् अन्यस्मिन् प्रसङ्गे प्रातःकाले मुम्बईनगरस्य कोस्टल् रोड् इत्यत्र बीएमडब्ल्यू-कारयानं दुर्घटनाम् आपन्नम्। अस्यां दुर्घटनायां त्रयाणां जनानां मृत्युः अभवत्, एकश्च जनः व्रणितः। व्रणितः चिकित्सालये प्रवेशितः अस्ति ।

# संयुक्त राष्ट्रसंघस्य एकाशीतितमम् सत्रम् सम्बोधिष्यति विदेशमन्त्री डॉ. जयशंकरः



भारतीयविदेशमन्त्री डॉ. एस. जयशंकरः अमेरिकायम् न्यूयार्कनगरे संयुक्तराष्ट्रसंघस्य महाधिवेशनस्यैकाशीतितमस्य (81वें) सत्रस्य उच्चस्तरीयसप्ताहे भारतीयप्रतिनिधिमण्डलस्य नेतृत्वं करिष्यति।डॉ. जयशंकरः अस्मिन् मासे षड्विंशतितमे (26) दिनाङ्के महाधिवेशनस्य उच्चस्तरीयसत्रं सम्बोधिष्यति। स्वयात्रायाः अवसरे सः विविधेषु बहुपक्षीयेषु द्विपक्षीयेषु च सम्मेलनेषु अपि भागं ग्रहीष्यति।

# महिला-क्रिकेट्-क्रीडायां, भारतं एशियाक्रीडानाम् निर्णायकचक्रे प्रविष्टम्




महिला-क्रिकेट्-क्रीडायां, भारतं एशियाक्रीडानाम् निर्णायकचक्रे प्रविष्टम्। जापानदेशे क्रीड्यमाने द्वितीये उपान्त्यचक्रे भारतेन बाङ्ग्लादेशदलं चतुर्दशाधिकैकशत-धावनाकैः पराजितम्। मङ्गलवासरे सुवर्णपदकाय आयोजिते निर्णायकचक्रे भारतदलं श्रीलङ्कादलं सम्मुखीकरिष्यति ।

# हिमाचल-प्रदेशे प्रथमवारं सम्प्राप्तं व्याघ्रयुगलम्

## १८०० किलोमीटर-यात्रामनुभूय रेणुकाजी-क्षेत्रम् आगतौ नर-व्याघ्रः व्याघ्री च



**हिमसंस्कृतवार्ताः- नाहनम्।** सिरमौरमण्डलस्य रेणुकाजीस्थितायां लघु- जन्तुशालायां दीर्घकालात् प्रचलन्ती व्याघ्र-प्रतीक्षा सम्प्रति समाप्ता जाता। हिमाचलप्रदेशे पर्यटकानाम् अवलोकनाय कस्मिंश्चित् मृगालये रक्षितुं व्याघ्रस्य प्रथमं युगलम् रविवासरे रेणुकाजीक्षेत्रे सम्प्राप्तम्। महाराष्ट्रस्य नागपुर- मण्डलस्थितात् 'घोडेवाला-संरक्षण-केन्द्रात्' उभौ व्याघ्रौ दृढ-सुरक्षा-व्यवस्थायाः मध्ये अत्र आनीतौ।

नागपुरतः रेणुकाजी-पर्यन्तम् उभाभ्यां व्याघ्राभ्यां प्रायः अष्टादश-शत-किलोमीटर-परिमितः (१८०० कि. मी.) सुदीर्घः प्रवासः कृतः। प्रायः त्रिचत्वारिंशत्- होराणां यात्राकाले वन्य-प्राणि-विभागस्य विशेषदलं ताभ्यां सहैव अवर्तत। आरक्षिसुरक्षायां सम्पन्नप्रवासे व्याघ्रयोः आहारस्य, विश्रामस्य, स्वास्थ्यस्य च विशेषं ध्यानं स्थापितम्।

रेणुकाजी-सम्प्राप्तौ सत्यां वन्य-प्राणि-विभागस्य अधिकारिषु कर्मचारिषु च परमोल्लासस्य वातावरणं निर्मितम्, मिष्टान्न-वितरणेन च अस्याः विशेषायाः उपलब्धेः उत्सवः आचरितः। रेणुकाजी-मृगालये व्याघ्रयोः आनयनाय प्रायः दशकात् (१० वर्षेभ्यः) प्रयासाः प्रचलन्ति स्म। विभागीय-वृत्तानुसारं तयोः कृते आधुनिकप्राङ्गणस्य निर्माणाय १.६७ कोटिरूप्यकाणि व्ययीकृतानि, सहैव वन्य-प्राणि-चिकित्सालयः अपि सज्जीकृतः।

### दशदिनानि यावत् चिकित्सकानां निरन्तरनिरीक्षणे स्थास्यतः व्याघ्रौ

रेणुकाजी-आगमनानन्तरम् उभौ व्याघ्रौ सद्यः एव पर्यटकानां पुरतः न आनेष्येते। साम्प्रतं तौ अन्तःप्रकोष्ठे स्थापितौ, यत्र तन्त्रज्ञानां वैद्यानां तत्त्वावधाने तयोः स्वास्थ्यस्य व्यवहारस्य च सूक्ष्मं परीक्षणं क्रियते।

आगामीनि दश-दिनानि यावत् नूतन-पर्यावरणाय तयोः अनुकूलन-प्रक्रिया प्रवर्तिष्यते। तदनन्तरं तौ बाह्य-परिसरे स्थापयितुं सज्जीक्रियते। सम्भाव्यते यत् पर्यटकाः आगामि- २ अक्टूबर २०२६ दिनाङ्कात् (गान्धी-जयन्त्याः अवसरे) प्रथमवारं रेणुकाजीक्षेत्रे व्याघ्रयुगलस्य दर्शनलाभं प्राप्स्यन्ति। नरव्याघ्रस्य वयः प्रायः पञ्चवर्षीयं, व्याघ्र्याश्च वयः त्रिवर्षीयं वर्तते। विभागपक्षतः तयोः नामकरणानन्तरं तौ पर्यटकेभ्यः उन्मुक्तौ विधास्येते।

### दश-वर्षाणां प्रतीक्षायाः जातः अन्तः

रेणुकाजीक्षेत्रे व्याघ्र-युगलस्य आगमनेन सहैव विगत-दशवर्षेभ्यः प्रचलन्ती प्रतीक्षा समाप्ता अभवत्। वन्य-प्राणिविभागस्य अरण्यपालः प्रीतिभण्डारी-महोदया व्याघ्रयोः सकुशल-सम्प्राप्तौ प्रदेशवासिभ्यः वर्धापनं समर्पितवती। सा स्पष्टीकृतवती यत् हिमाचल-राज्ये पर्यटकानाम् आकर्षणाय इदं प्रथममेव व्याघ्रयुगलम् अस्ति। तौ रेणुकाजीपर्यन्तम् आनेतुं विभागः दीर्घप्रक्रियाभिः विधिक-औपचारिकताभिश्च न्यगच्छत्।

व्याघ्रौ सकुशलम् आनयत्सु प्रमुखेषु प्रभागीय-वनाधिकारी डॉ. शाहनवाज अहमदभट्टः, वरिष्ठ-पशु- चिकित्सकः डॉ. कार्तिकसिंहचौधरी, रेणुका-क्षेत्राधिकारी राकेशकुमारः कर्मचारिणश्च प्रमुखाः आसन्। अधुना अनुकूलन-प्रक्रियायाः समाप्तेः परमेव तयोः नियमित-प्रदर्शनाय निर्णयः स्वीकरिष्यते।

# विपक्षनेतुः जयराम ठाकुरस्य प्रहारः- 'सुक्खूमहोदयः भाजपादलस्य वर्गान् गणयन् आसीत्,

## काङ्ग्रेसदलस्य वर्गाश्च तस्य आसन्दं चालयन्ति स्म'



**हिमसंस्कृतवार्ताः- हमीरपुरम्।** पूर्व-मुख्यमन्त्री, विधानसभायाः विपक्षनेता जयरामठाकुरः रविवासरे सुजानपुर- विधानसभाक्षेत्रे भाजपादलस्य नवनिर्वाचितानां पञ्चायतीराज-प्रतिनिधीनां सम्मानसमारोहे प्रदेशस्य काङ्ग्रेससर्वकारस्य उपरि तीक्ष्णं प्रहारं कृतवान्। सः मुख्यमन्त्रिणः सुखविन्दरसिंहसुक्खू-महोदयस्य कार्यशैलीं, विकासकार्याणि, पञ्चायत- निर्वाचनानि, प्रदेशे वर्धमानं ऋण-भारं च लक्ष्यीकृत्य विविधान् प्रश्नान् उत्थापितवान्।

जयरामठाकुरेण आरोपः आरोपितः यत् मुख्यमन्त्री जनभावनानाम् अनुगुणं सर्वकारस्य सञ्चालनस्थाने केवलं स्व-प्रियाणाम् आप्तजनानां मन्त्रणया एव निर्णयान् गृह्णाति। सः व्यङ्ग्यं कुर्वन् अवदत् यत् मुख्यमन्त्री निरन्तरं भाजपा-दलस्य वर्गाणां चर्चां करोति स्म, यत्रैव काङ्ग्रेसदलस्य आभ्यन्तरिक-कलहेन सर्वकारस्य स्थैर्यमेव सङ्कटापन्नं दृश्यते।

### देहलीप्रवासाः सर्वकार-रक्षणाय- जयरामठाकुरः

तेन पक्षः कृतः यत् प्रदेश-सर्वकारस्य मन्त्रिणः मुख्यमन्त्री च निरन्तरं देहलीयात्रासु व्यग्राः सन्ति। जयरामठाकुरः आरोपयत् यत् एतेषां देहलीप्रवासानाम् उद्देश्यं प्रदेशस्य विकासापेक्षया सर्वकारस्य अन्तः प्रचलद्भिः राजनैतिक-सङ्क्षोभैः सह अधिकं सम्बद्धम् अस्ति। सः अवदत् यत् यदि देहलीयात्राः प्रदेशहिताय विकासार्थं वा स्युः तर्हि ताः अभिनन्दनीयाः, किन्तु यदा सर्वकारस्य रक्षणार्थं देहलीगमनस्य वार्ताः पुरतः आगच्छन्ति, तदा अवश्यमेव संशयाः समुत्पद्यन्ते।

### पञ्चायत-निर्वाचनानि विलोपयितुं जातः आसीत् प्रयासः

पञ्चायतीराज-संस्थाः लोकतन्त्रस्य महत्त्वपूर्णाः आधारभूतानि अङ्गानि प्रतिपादयन् विपक्षनेता पञ्चायत-निर्वाचन-विषयेऽपि सर्वकारं कटुवचनैः आक्रान्तवान्। तेन आरोपः विहितः यत् सर्वकारेण निर्वाचनानां स्थगनाय प्रयासः कृतः आसीत्, निर्वाचितानां प्रतिनिधीनां प्रति अपि समुचितः व्यवहारः न विहितः। जयराम-ठाकुरः अवदत् यत् भाजपादलेन निर्वाचन-सम्पन्नाय न्यायालयस्य आश्रयः गृहीतः, सम्प्रति च दलपक्षतः एतेषां नवनिर्वाचितानां जन-प्रतिनिधीनां गौरव-सम्मानः क्रियते। विगत-पञ्चायतीराज-निकाय-निर्वाचन-परिणामानाम् उल्लेखं कुर्वन् तेन प्रतिपादितं यत् एकादशसु मण्डलेषु दशसु (१०/११) जिला-परिषत्सु त्रिषु नगरनिगमेषु च भाजपा-विचारधारया युक्ताः अभ्यर्थिनः विजयं प्राप्तवन्तः। सः प्रत्यपादयत् यत् राज्ये प्रायः अशीति-प्रतिशतं (८०%) जनप्रतिनिधयः भाजपा-विचारधारा-समर्थिताः निर्वाचिताः सन्ति।

### विकासरोधनं पिहित-संस्थानानां च विषयः

जयरामठाकुरेण विकासप्रक्रियाणाम् अवरोधं पिहितसंस्थानानां च विषयम् उत्थाप्य सर्वकारः आक्षिप्तः। सः आरोपयत् यत् वर्तमान-शासने नूतनयोजनानां प्रारम्भापेक्षया पूर्वतन- भाजपा-सर्वकारेण लोकार्पितानि अनेकानि संस्थानानि पिहितानि (स्थगितानि) कृतानि।

स्व-सर्वकारस्य उपलब्धयः प्रकाशयन् सः पन्थानं सामाजिक-सुरक्षा-योजनाः च संस्मृतवान्। जयरामठाकुरेण विज्ञापितं यत् तस्य कार्यकाले प्रायः पञ्चसहस्र-किलोमीटर-परिमितस्य मार्गस्य निर्माणं सञ्जातम् आसीत्, वार्धक्य- वृद्धवृत्तिप्राप्तेः आयुसीमा च अशीतिवर्षेभ्यः (८०) षष्टि-वर्षेषु (६०) न्यूनीकृता आसीत्।

# वर्षाभारद्वाजमहोदयायाः मार्गदर्शने दुगड्डाखण्डे संस्कृतस्पर्धाः सम्पत्स्यन्ते

## दुगड्डाखण्डस्तरीयाः संस्कृतस्पर्धाः २३,२४ सितम्बर २०२६ दिनांके समायोज्यन्ते




**हिमसंस्कृतवार्ताः- कुलदीपमैन्दोला**

उत्तराखण्ड- संस्कृत- संस्थानस्य हरिद्वारस्य (उत्तराखण्डसर्वकारस्य) संस्कृतभाषायाः प्रचार- प्रसारार्थं आयोजितानां संस्कृतछात्रस्पर्धानां प्रथमचरणरूपाः खण्डस्तरीयाः संस्कृतस्पर्धाः दुगड्डाविकासखण्डे वर्षाभारद्वाजमहोदयायाः शिक्षाधिकारिण्याः मार्गदर्शने सम्पत्स्यन्ते। संस्थानेन अष्टादशसंस्कृतमहोत्सवस्य संस्कृतस्पर्धानां संचालनाय खण्डशिक्षाधिकारिमहोदया मार्गदर्शिकारुपेण विनिर्दिष्टा वर्तते

**स्पर्धायां दायित्वं संसूचितम्**

आयोज्यमानानां संस्कृतच्छात्रप्रतियोगितानां प्रथमचरणस्य खण्डस्तरीयप्रतियोगितानां सम्बन्धे दुगड्डाखण्डस्य संयोजिकायाः बीनागौडमहोदयायाः संयोजकत्वे व्यवस्थाविषये शिक्षकाणां महत्वपूर्णा गोष्ठी अभवत्। यत्र निर्णायकस्य अभिलेखस्य व्यवस्थायाः विषये दायित्वं संसूचितं।

**प्रतियोगितानां तिथयः निश्चिताः-**

गोष्ठ्यां पौडीजनपदस्य संयोजकः, पूर्वराज्यसहसंयोजकः रोशनगौडमहोदयः अवदत् यत् समस्ताः खण्डस्तरीयाः प्रतियोगिताः खण्डशिक्षाधिकारिणां मार्गदर्शने २३-२४ सितम्बर २०२६ दिनांके सम्पन्नाः भविष्यन्ति।

**दुगड्डाखण्डे आयोजनस्थलम्-**

दुगड्डाखण्डस्य कनिष्ठवरिष्ठषड्विधप्रतियोगिताः मेहरबानसिंहकण्डारी- सरस्वती- विद्यामन्दिरे (इ. का.) कालाबढे, कोटद्वारे आयोजिताः भविष्यन्ति।

**संस्कृतस्य प्रचारः सर्वेषां कर्त्तव्यम्-**

बीना गौडमहोदया उक्तवती यत् संस्कृतम् उत्तराखण्डस्य द्वितीया राजभाषा अस्ति, सर्वभाषाणां जननी च। अतः संस्कृतभाषायाः संरक्षणं, संवर्धनं, प्रचारश्च प्रत्येकस्य नागरिकस्य कर्त्तव्यं वर्तते।

**द्वौ वर्गौ, षट् प्रतियोगिताः-**

प्रतियोगिताः द्वयोः वर्गयोः भविष्यन्ति।
कनिष्ठवर्गः- कक्षा ६ तः १० पर्यन्तम्,
वरिष्ठवर्गः- कक्षा ११ तः स्नातकोत्तरपर्यन्तम्।
आयोजनीयाः प्रतियोगिताः-
संस्कृतसमूहगानं, संस्कृतसमूहनृत्यं, संस्कृतनाटकं, संस्कृताशुभाषणं, संस्कृतश्लोकोच्चारणं, संस्कृतवादविवादः उत्कृष्टप्रदर्शनकर्तृभ्यः पुरस्काराः अपि प्रदास्यन्ते।

**अधिकाधिकं सहभागितायै आह्वानम्**

संयोजिकया समस्तेषां राजकीय- अराजकीय- विद्यालयानां छात्र-छात्राभ्यः आह्वानं कृतं यत् ते अधिकाधिकसंख्यया प्रतियोगितासु सहभागित्वा स्वप्रतिभां प्रदर्शयन्तु।

**सहयोगस्य आश्वासनम्-**

अस्यां गोष्ठ्यां भूतपूर्वप्रधानाचार्यः, पौडीजनपदस्य सहसंयोजकः डॉ. रमाकान्तकुकरेतीमहोदयः, पूर्वखण्डसंयोजकः कुलदीपमैन्दोला महोदयश्च स्वविचारान् प्रस्तूय कार्यक्रमस्य सफलसम्पादनाय पूर्णसहयोगस्य आश्वासनम् दत्तवन्तौ।

# राजकीय- गोरक्षनाथ- संस्कृतमहाविद्यालये नाहने पुरातन-छात्र-सङ्गठनस्य निर्माणम्



**हिमसंस्कृतवार्ताः- सिरमौरः।** राजकीय- गोरक्षनाथ- संस्कृतमहाविद्यालये नाहने पुरातन-छात्र-सङ्गठनस्य निर्माणं जातम्। अस्यां सभायां सर्वसम्मत्या अध्यक्षपदे दिलीपवशिष्ठः, महासचिवपदे डा. नरेन्द्रराणा, कोषाध्यक्षपदे अमितशर्मा उपाध्यक्षपदे सुरेशशर्मा उपसचिवपदे कमलेशकुमारः, संयुक्तसचिवपदे अर्चनाशर्मा, कोषाध्यक्षः अमितशर्मा मनोनीतसदस्यः धनवीरशर्मा सञ्जयकुमारः दीपिकाशर्मा च चयनिताः। एतस्याः गोष्ठ्याः अध्यक्षता महाविद्यालयस्य आचार्यः सोमदत्तः ओंकारवर्यः च कृतवन्तौ। अस्यां गोष्ठ्यां अस्मात् महाविद्यालयात् उत्तीर्णैः अनेकैः पुरातनछात्रैः भागः गृहीतः। ते सर्वे अस्याः समित्याः गठनस्य कृते मंगलकामनाः प्रकटितवन्तः, स्वकीययोगदानं प्रदातुं च वचनं दत्तवन्तः। एतदतिरिक्तमस्यां गोष्ठ्यां मनोजशर्मा, गोविन्दशर्मा, अमितशर्मा, विक्रमः, सतीशकंवरः, राजेन्द्रठाकुरः, संजयः इत्यादयः विशेषरुपेणोपस्थिताः आसन्। छात्रसंघस्य नवनिर्वाचितः अध्यक्षः दिलीपवसिष्ठवर्यः स्वकीये आभारभाषणे अस्य महाविद्यालयस्य पूर्वप्राचार्यान् स्वगुरुजनांश्च अस्मरत्, तथा च छात्रसंघस्य सर्वान् सदस्यान् सर्वसम्मत्यै कारणात् धन्यवादम् व्याहरत्। अध्यक्षः अस्याः संस्थायाः प्रति स्वकीयां कृतज्ञतां समर्पणभावं च प्रकटयन् संस्थायाः सेवायै प्रगत्यै च समर्पितः भूत्वा स्वकीयदायित्वस्य निर्वहणस्य सङ्कल्पम् अकरोत्।

# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। मया प्रथमा वार्ता आनीता। एकेन कैनेडा-देशीयक्रीडकेन कूर्दनयन्त्रे कूर्दता रूबिक-घन-क्रीडनकं समीकृतम्। नूतनः विश्वविक्रमः स्थापितः।

**नन्दिनी-** अहो आश्चर्यम्! तेन महत् सन्तुलनं दर्शितम्। इदानीं द्वितीया वार्ता। खगोलशास्त्रज्ञैः एकः नूतनः ग्रहः दृष्टः। तस्य भ्रमण-पथः अतीव वक्रः। सः ग्रहः शीघ्रं दृष्टिपथात् लुप्तः भविष्यति इति तैः चिन्तितम्।

**काव्या-** अद्भुतं खलु! अन्तरिक्षस्य रहस्यं न ज्ञातम्। तृतीया वार्ता अस्ट्रेलियादेशात् प्राप्ता। तत्र अरण्ये एकेन जनेन महावानर-सदृशस्य प्राणिनः पदशब्दः श्रुतः। तत्र अतीव दुर्गन्धः अपि अनुभूतः।

**नन्दिनी-** वनप्राणिनां कथाः तु सदा भयानकाः। अन्तिमा वार्ता यन्त्र-मानवविषये अस्ति। एकस्याः कृत्रिम-बुद्धि-अभिनेत्र्याः साक्षात्कारः प्रसारितः। मध्ये एव तस्याः कार्यक्रमे यन्त्रदोषः जातः। तया आङ्ग्लभाषा त्यक्ता, चीनभाषया च भाषितम्।

**काव्या-** हास्यकरः यन्त्रदोषः! सर्वैः एताः विचित्राः वार्ताः श्रुताः। अद्य एतावत् एव।

**हिमसंस्कृतवार्ताः, ईदरधीररजः**



# युवानां कलाप्रतिभाप्रदर्शनाय त्रिंशत्तमः जिलास्तरीयः युवामहोत्सवः आयोजयिष्यते



**हिमसंस्कृतवार्ताः- डॉ. विमलेश झा, खगडिया**
युवकलाकाराणां प्रतिभां प्रकाशयितुं तेषां सृजनात्मककौशलस्य प्रदर्शनाय च त्रिंशत्तमः जिलास्तरीयः युवामहोत्सवः २०२६ आयोजयिष्यते। अस्य आयोजनं जिलाप्रशासनस्य तथा जिला- कलासंस्कृति- कार्यालयस्य संयुक्ततत्त्वावधानेन क्रियमाणम् अस्ति। जिला- कलासंस्कृति- पदाधिकारी घनश्यामकुमारः अवदत् यत् युवामहोत्सवः जनपदे प्रतिभासम्पन्नानां युवानां कृते स्वकीयां कलां सृजनात्मकप्रतिभां च प्रदर्शयितुं महत्त्वपूर्णम् अवसरं प्रदास्यति। अतः योग्याः इच्छुकाः च युवानः निर्धारितसमयसीमायाम् आवेदनं कृत्वा अधिकाधिकसंख्यया महोत्सवे भागं गृह्णन्तु इति तेन आह्वानं कृतम्। अस्मिन् महोत्सवे पञ्चदशतः एकोनत्रिंशद्वर्षपर्यन्तस्य आयुवर्गस्य युवानः विविधासु सांस्कृतिकासु, कलात्मकासु तथा सृजनात्मकासु विधासु सहभागितां कर्तुं शक्नुवन्ति। युवामहोत्सवे शास्त्रीयगायनं, कथकनृत्यं, एकललोकगीतगायनं, समूहलोकगीतगायनम्, एकललोकनृत्यं समूहलोकनृत्यम् इत्यादीनां प्रतियोगितानां आयोजनं भविष्यति। तदतिरिक्तं तबलावादनं, हार्मोनियमवादनं, वंशीवादनं चेत्यादिषु वाद्यविधास्वपि युवानः स्वप्रतिभां प्रदर्शयितुं शक्नुवन्ति। सृजनात्मकप्रतिभानां प्रोत्साहनाय चित्रकलायाः, मूर्तिकलायाः, कलाशिल्पस्य, छायाचित्रणस्य, भाषणस्य, कथालेखनस्य तथा कवितालेखनस्य प्रतियोगिताः अपि आयोजिताः भविष्यन्ति। प्रतियोगितायां भागं ग्रहीतुं इच्छुकैः युवभिः निर्धारितप्रपत्रे आवेदनं करणीयम्। आवेदनपत्रेण सह आधारपत्रस्य छायाप्रतिः, द्वे वर्णयुक्ते पासपोर्ट इति आकारस्य छायाचित्रे च अनिवार्यतया समर्पणीये। इच्छुकाः प्रतिभागिनः स्वीयम् आवेदनपत्रं ३० सितम्बर २०२६ पर्यन्तं जिला- कलासंस्कृतिकार्यालये, उत्सवपैलेस, राजेन्द्रनगर, खगडिया इत्यत्र समर्पयितुं शक्नुवन्ति। जिलाप्रशासनस्य, जिला- कलासंस्कृति- कार्यालयस्य प्रयासः अस्ति यत् जिले अधिकाधिकाः युवानः कलाकाराः अस्मिन् महोत्सवे सम्मिलिताः भूत्वा स्वकीयां प्रतिभां प्रदर्शयेयुः। एतादृशैः आयोजनैः युवाकलाकाराणां प्रतिभायाः परिष्काराय तेषां राज्यस्तरीयमञ्चं प्रति अग्रसराय च अवसरः प्राप्यते।

# राजकीय- संस्कृत- शिक्षकपरिषदः

## सिरमौरमण्डलस्य महत्त्वपूर्णा सभा नाहने सम्पन्ना




**हिमसंस्कृतवार्ताः- नाहनम्, सिरमौरः।** २० सितम्बर २०२६ तमे वर्षे राजकीय- संस्कृत- शिक्षकपरिषदः सिरमौरमण्डलस्य महत्त्वपूर्णा सभा राजकीय- संस्कृत- महाविद्यालये, नाहने सम्पन्ना। सभायाः अध्यक्षतां आचार्यदेवेन्द्रशर्मा, अध्यक्षः, राजकीयसंस्कृतशिक्षकपरिषदः सिरमौरमण्डलं, हिमाचलप्रदेशः अकरोत्। सभायां सिरमौरमण्डलस्य विभिन्नेभ्यः शिक्षाखण्डेभ्यः परिषदः अध्यक्षाः, मण्डलीयकार्यकारिण्याः सदस्याः, सिरमौरमण्डलसम्बद्धाः राज्यकार्यकारिण्याः सदस्याः उपस्थिताः सन्तः परिषदः आगामीकार्ययोजनायाः, सङ्गठनात्मक- क्रियाकलापानां, संस्कृताध्यापकैः सम्बद्धानां विविधमहत्त्वपूर्णविषयाणां विषये विस्तरेण चर्चां कृतवन्तः। सभायां परिषदः संरक्षकः आचार्यः राधेश्यामनौटियालः, सङ्गठनमन्त्री दिलीपवशिष्ठः, महासचिवः गोविन्दशर्मा, वित्तसचिवः अतुलशर्मा, वरिष्ठोपाध्यक्षः धनवीरशर्मा च विशेषरूपेण उपस्थिताः आसन्। तदतिरिक्तं सिरमौरमण्डलसम्बद्धाः राज्यकार्यकारिण्याः सम्मानिताः सदस्याः डा. नरेन्द्रराणा, दीपिकाशर्मा, अर्चनाशर्मा, सञ्जयचौधरी च इत्येतेषां गरिमामयी उपस्थितिः अभवत्। मण्डलीयकार्यकारिण्याः विभिन्नशिक्षाखण्डेभ्यश्च अमितशर्मा, सतीशकँवर, सुनीलडिमरी, मस्तरामशर्मा, सतीशशर्मा, जयपालशर्मा, देवेन्द्रशर्मा, जगपालशर्मा, नितेशशर्मा, मनोजशर्मा, कमलेशशर्मा इत्यादयः अन्ये च सम्मानिताः पदाधिकारिणः सदस्याश्च उपस्थिताः आसन्। सभायां संस्कृताध्यापकानां विविधानां लम्बितसमस्यानां, सङ्गठनस्य अधिक- सुदृढीकरणस्य सक्रियतावर्धनस्य च, आगामीकार्यक्रमाणां क्रियाकलापानां च रूपरेखानिर्माणस्य, शिक्षकहितसम्बद्धविषयाणां समुचितमञ्चे प्रभावीरीत्या प्रस्तुतीकरणस्य विषये विस्तृतः विचारविमर्शः अभवत्।
अध्यक्षः आचार्यः देवेन्द्रशर्मा अवदत् यत् परिषदः उद्देश्यं सिरमौरमण्डलस्य संस्कृताध्यापकान् सशक्तं मञ्चं प्रदातुं, तेषां सामूहिकान् व्यक्तिगतांश्च विषयान् समुचितस्तरे उपस्थापयितुम् अस्ति। सः सर्वेभ्यः पदाधिकारिभ्यः सदस्येभ्यश्च सङ्गठनस्य क्रियाकलापेषु सक्रियसहभागितां सुनिश्चितुं आह्वानं कृतवान्। सभायामुपस्थितैः सर्वैः सदस्यैः परिषदः अधिकं सुदृढां कर्तुं, संस्कृतशिक्षायाः संस्कृताध्यापकानां च हिताय परस्परं सहयोगेन कार्यं कर्तुं सङ्कल्पः कृतः।

# "संस्कृतकथामञ्जरी" {२१}

## ।।द्वात्रिंशत्पुत्तलिकासिंहासनम्।।

## "मन्मथसञ्जीवनीवृत्तान्तो नाम पञ्चदशोपाख्यानम् (१)

अथ नित्यप्रतिहत- सिंहासनाधिरोहण- विक्तवमानसमपि स्वाभीष्टपरवशं भोजदेव प्रतिषिध्य पुनरन्या पुत्तलिकाऽब्रवीत्, श्रृणु राजन्- विक्रमार्के राज्यं कुर्वति, तस्य पुरोहितो वसुमित्रः परमोपकारो सर्वलोकस्य महाधनसम्पन्नश्च आसीत्। तेन एकदा विचारितं- ननु उपार्जितानां पापानां गङ्गास्नानादन्यत् क्षयसाधनं नास्ति। उक्तञ्च-
**"जात्यन्धा न च तुल्यास्ते खगेः पशुभिरिव च।**
**समर्था ये न पश्यन्ति गङ्गा पापप्रणाशिनीम्।।**
इत्येवं विचार्य्य वाराणसीं गतो विश्वेश्वरं दृष्ट्वा,प्रयागे पुनः माघस्नानं विधाय स्वनगराभिमुखमगच्छत्। प्रतिनिवृत्तस्य तस्य मार्गे नगरमेकमासीत्। तत्र नगरे शापभ्रष्टा सुराङ्गना काचित् राज्यं करोति, तस्याः भर्ता नास्ति। तत्र लक्ष्मीनारायणस्य महान् प्रासदो विद्यते। तत्समीपे विवाहमण्डपः सज्जितोऽस्ति; देवताप्रासादद्वारे च महति लोहपात्रे तैलं तप्यते। तत्र नियुक्ताः पुरुषाः देशान्तरादागतानेवं वदन्ति- यदि काश्चित् सत्वाधिकोऽस्मिन् सन्तप्ततैलमध्ये पतिष्यति, तस्य मन्मथसञ्जीवनी नाम्नी अप्सराः कण्ठे मालामर्पयिष्यति।
वसुमित्र सर्वमेतत् पश्यन् श्रृण्वंश्च स्वनगरं ययौ। सर्वैर्बन्धुभिः सह सन्दर्शनं जातम्। असौ क्षेमेण आगत इति सर्वेषाम् आनन्दोऽभूत। ततः परेद्यु प्रभाते राजमन्दिरं गतः, राजानं दृष्ट्वा राज्ञे गङ्गोदकं विश्वेश्वरप्रसादश्च दत्त्वोपविष्टिः। ततः राज्ञा पृष्टः- भो वसुमित्र! कुशलिना तीर्थयात्रा कृता? तेनोक्तं- भो स्वामिन्! तव प्रसादात् तीर्थयात्रां विधाय कुशली समागतोऽस्मि। राज्ञोक्तं- तत्र देशान्तरं गतेन किमपूर्वं दृष्टम्? राज्ञा एवं पृष्टेन वसुमित्रेण सुराङ्गना तप्ततैलवृत्तान्तः कथितः।

**डा. वर्षा प्रकाश टोणगांवकर**
**पुणे, महाराष्ट्रम्**



# एकादशीव्रतम्

मिथिलायां विशेषव्यापकतया समाचर्यमाणम् इदं व्रतं सम्पूर्णसनातनपरम्परायाः अपि आध्यात्मिकी धरोहरः वर्तते। आत्मशुद्धेः संयमस्य साधनायाश्च महापर्वः चतुर्दिवसीयं व्रतानुष्ठानं सितम्बरमासस्य एकविंशतितमात् (२१) चतुर्विंशतितमं (२४) दिनं यावत्, सनातनपरम्परायां विशेषं महत्त्वं धत्ते। तिथेः कालस्य सङ्कल्पस्य च त्रिवेणीसङ्गमे स्थिता इयं साधनापरम्परा; देशस्य सर्वत्र श्रद्धालवः स्वस्वपरम्परानुसारं पालनं करिष्यन्ति

सनातनधर्मे व्रतं केवलं भोजनत्यागक्रिया न भवति, अपि तु मनुष्यस्य अन्तः संयमस्य, समर्पणस्य, आत्मपरिष्काराय च एका सम्पूर्णा साधनापद्धतिः वर्तते। भारतीयकालगणनायां धर्मशास्त्रेषु च शताब्दीभ्यः इयं परम्परा प्रचलति यत् प्रत्येकस्य व्रतस्य स्वकीयं विधानं, स्वकीयः कालः, स्वकीया मर्यादा च भवति। अस्याः मर्यादायाः पालने एव व्रतस्य सत्या सिद्धिः निहिता मन्यते। अस्यामेव शृङ्खलायां सितम्बरमासस्य एकविंशतितमात् चतुर्विंशतितमं दिनं यावत् चतुर्दिनपर्यन्तं प्रचलिष्यत् इदं विशेषं व्रतानुष्ठानं भगवतो विष्णोः आराधनायाः, इन्द्रियसंयमस्य, आत्मशुद्धेश्च प्रतीकं भूत्वा श्रद्धालुजनानां मध्ये विशेषम् उत्साहं श्रद्धां च जनयति। अयं साधनाक्रमः देशस्य विविधेषु प्रदेशेषु प्रचलितायाः मैथिलपञ्चाङ्गपरम्परायाः अनुरूपं विशेषरूपेण पाल्यते, यत्र च देशस्य अन्ये श्रद्धालवः स्व- स्व- स्थानीयपञ्चाङ्गस्य मान्यतायाश्च अनुसारेण एकादशी-द्वादशी-पारणविधीनां निर्वहणं कुर्वन्ति। इयमेव विविधता सनातनपरम्परायाः तां व्यापिकाम् आध्यात्मिकीं चेतनां दर्शयति, यत्र भक्तेः साधनायाश्च मूलभावः एकः सन्नपि तस्याः अभिव्यक्तिः देशस्य प्रत्येके कोणे स्वकीये स्वकीये वर्णे प्रकटीभवति।

## प्रथमसोपानम्- एकभुक्तेन आत्मानुशासनस्य शुभारम्भः (सितम्बर २१)

अस्य महतः साधनाक्रमस्य प्रारम्भः सितम्बरमासस्य एकविंशतितमे दिने एकभुक्तव्रतेन भविष्यति। अस्मिन् दिने साधकाः आदिनं केवलम् एकवारं सात्त्विकं भोजनं गृहीत्वा आगामिदिनस्य दुष्करायाः एकादशीसाधनायाः कृते स्वयं शारीरिकरूपेण मानसिकरूपेण च सज्जीकुर्वन्ति। एषः सोपानः केवलं भोजनस्य सीमितीकरणमात्रं न, अपि तु मनसः भगवत्स्मरणस्य, जपस्य, ध्यानस्य च दिशि परिवर्तनस्य प्रारम्भिकः अभ्यासः वर्तते। यथा साधकः स्वान्तः स्थितां चञ्चलतां शमयित्वा, आगामिन उपवासस्य कठोरानुशासनाय स्वयं समर्पयति।

## द्वितीयसोपानम्- एकादशी- इन्द्रियनिग्रहस्य विष्णुभक्तेश्च पराकाष्ठा (सितम्बर २२)

सितम्बरमासस्य द्वाविंशतितमे दिने स्थानीयसूर्योदयानुसारं मान्यमैथिलव्रतपद्धत्यनुसारं एकादशीव्रतस्य मुख्यः उपवासक्रमः प्रारभ्यते इति मन्यते। यतः प्रत्येकस्य स्थानस्य सूर्योदयः भिन्नः भवति (यथा पटनानगरस्य, दिल्लीनगरस्य, उदयपुरनगरस्य च उदयकालः पृथक्-पृथक् एव), अतः अत्र निश्चितः घटिकाकालः न दत्तः, अपितु साधकैः स्वस्वस्थानानुरूपं सूर्योदयकालम् अवगम्य एव उपवासस्य प्रारम्भः कर्तव्यः। एषः दिवसः सम्पूर्णसाधनायाः केन्द्रबिन्दुः वर्तते। यत्र साधकाः स्वकीयसङ्कल्पबलस्य शारीरिकसामर्थ्यस्य च अनुरूपं निर्जलं, निराहारं वा फलाहारव्रतं पालयन्तः स्वयं पूर्णतया भगवतो नारायणस्य चरणयोः समर्पयन्ति।

धर्मशास्त्रेषु एकादश्याः महिमानं वर्णयद्भिः उक्तं यत् अस्मिन् दिने निराहारं स्थित्वा इन्द्रियेषु संयमं धारयन् साधकः भगवतो विष्णोः सामीप्ये लीनः स्यात्। स एव क्षणः यत्र बाह्यभोगेभ्यः विमुखः भूत्वा साधकः स्वकीयां सम्पूर्णां चेतनाम् ईश्वरकेन्द्रिताम् करोति। इयमेव एकादशीव्रतस्य आध्यात्मिकी उन्नतिः, यया एतत् सनातनपरम्परायाः सर्वाधिकफलप्रदव्रतेषु गण्यते।

## तृतीयसोपानम्- हरिवासरः- मर्यादायाः संयमस्य च अग्निपरीक्षा (सितम्बर २३)

सितम्बरमासस्य त्रयोविंशतितमे दिने हरिवासरस्य विशेषा साधना भविष्यति, या अस्य व्रतक्रमस्य सर्वाधिकसूक्ष्मः अनुशासनप्रधानः च सोपानः मन्यते। धर्मशास्त्रीयपरम्परायां द्वादशीतिथेः प्रथमः पादः हरिवासरसंज्ञया अभिहितः। स्पष्टं विधानम् अस्ति यत् एतां मर्यादाम् अलङ्घ्य पारणं कर्तुं शास्त्रसम्मतं न भवति। अर्थात् साधकस्य कृते केवलम् उपवासस्य पूर्तिः पर्याप्ता न, अपि तु हरिवासरस्य कालसीमायाः धैर्यपूर्वकं पालनम् एव व्रतं सम्पूर्णं फलं प्रयच्छति। इयमेव सा विशिष्टता या इमां साधनां सामान्योपवासात् उपरि उन्नीय अनुशासितायाः शास्त्रसम्मतायाः तपस्याः स्वरूपं ददाति।

## चतुर्थसोपानम्- पारणम्- संयमस्य पूर्णाहुतिः (सितम्बर २४)

अस्य चतुर्दिवसीयस्य महासाधनायाः समापनं सितम्बरमासस्य चतुर्विंशतितमे दिने स्थानीय- सूर्योदयस्य अनन्तरम् एव भविष्यति। किन्तु अत्र एतत् बोद्धं परमावश्यकं यत् पारणस्य अर्थः सूर्योदये सति तत्क्षणमेव भोजनारम्भः इति कदापि न। वास्तविकं पारणं तदैव विधिसम्मतं मन्यते यदा हरिवासरस्य मर्यादा पूर्णा जाता भवति, शास्त्रोक्तः अन्त्योदयकालः च आगतः भवति। यतः देशस्य विभिन्नेषु नगरेषु- पटना, दिल्ली, उदयपुर इत्यादिषु सूर्योदयस्य समयः पृथक्-पृथक् भवति, अतः अत्रापि निश्चितः घटिकाकालः प्रदत्तः नास्ति; साधकैः स्वस्वस्थानीयपञ्चाङ्गे उल्लिखितं शास्त्रोक्तम् अन्त्योदयकालं ज्ञात्वा तदनुसारमेव पारणविधिः निर्वाह्यः। अस्मिन्नेव निर्धारिते काले भगवतः विष्णोः स्मरणपूजनं, तुलसी-अर्चनं, शास्त्रोक्तविधिना च व्रतस्य पारणं क्रियते। श्रद्धालुजनान् प्रति निवेदनम् अस्ति यत् ते स्वकीयसङ्कल्पस्य अनुरूपं, यत् पञ्चाङ्गं परम्परां वा अनुसरन्ति, तस्यैव निर्धारितं पारणविधानं सादरं पालयन्तु।

## संयमः श्रेष्ठः, परन्तु स्वास्थ्यस्य उपेक्षा न

अस्यां साधनायाम् असङ्ख्याः श्रद्धालवः स्वकीयया अटलया श्रद्धया दृढेन सङ्कल्पेन च सह निर्जलव्रतं पालयन्ति, यत् तपसः आत्मनिग्रहस्य च सर्वोच्चं रूपं मन्यते। किन्तु एतत् स्मर्तव्यं यत् व्रतस्य मूलम् उद्देश्यं शरीरस्य पीडनं न, अपि तु आत्मसंयमस्य, ईश्वरस्मरणस्य, आत्मशुद्धेश्च प्राप्तिः वर्तते। अतः ये जनाः शारीरिकरूपेण समर्थाः सन्ति, त एव स्वसामर्थ्यानुसारं निर्जलव्रतस्य सङ्कल्पं गृह्णन्तु। वृद्धजनाः, बालकाः, गर्भवत्यः स्त्रियः, रुग्णाः जनाः, नियमितौषधसेवनं कुर्वन्तः श्रद्धालवः वा स्वस्वास्थ्यस्थित्यनुरूपम् एव व्रतविधिं स्वीकुर्वन्तु, आवश्यकतायां च चिकित्सकीयं परामर्शम् अवश्यं गृह्णन्तु। श्रद्धायां दृढता भवतु, परन्तु स्वास्थ्यस्य उपेक्षा मा भवतु इयमेव व्रतस्य सन्तुलिता सत्या च भावना।

## चतुर्दिनानां साधनायात्रा एकदृष्ट्या-

**सितम्बर २१, एकभुक्तम्- आत्मानुशासनस्य शुभारम्भः**

**सितम्बर २२, स्थानीयसूर्योदयतः एकादशी- उपवासस्य प्रारम्भः**

**सितम्बर २३, हरिवासरः- संयमस्य मर्यादायाश्च साधना**

**सितम्बर २४, स्थानीयसूर्योदयानन्तरं शास्त्रोक्तान्त्योदयकाले व्रतस्य समापनम्**

## व्यापिकायाः सनातनपरम्परायाः आध्यात्मिकी धरोहरः

यद्यपि अस्य व्रतसाधनायाः विधिव्यवस्था मैथिलपञ्चाङ्गपरम्परायां विशिष्टरूपेण वर्णिता वर्तते, तथापि तस्याः मूलः भावः भगवतः विष्णोः अनन्या भक्तिः, इन्द्रियसंयमः, आत्मनिग्रहः, आत्मशुद्धिः च सम्पूर्णायाः सनातनपरम्परायाः साझा आध्यात्मिकी विरासत् वर्तते। देशस्य प्रत्येके कोणे, यत् किमपि पञ्चाङ्गं परम्परां वा अनुसृत्य, इयं भावना समाना तिष्ठति यत् व्रतं केवलं शारीरिकं तपः न, अपितु आत्मानं ईश्वरस्य समीपं नयतः दिव्यं माध्यमं वर्तते। इयमेव इमां साधनां कालस्य, स्थानस्य, परम्परायाश्च सीमाभ्यः परं, एकस्य सार्वभौमिकस्य आध्यात्मिकानुष्ठानस्य स्वरूपं प्रयच्छति।

- डॉ. राघवनाथझा,
ज्योतिषाचार्यः स्वतन्त्रपत्रकारश्च




-विदुरः

मैगी एका एव स्त्री अस्ति... या द्वाभ्यां निमेषाभ्यां सज्जा भवति! 😳 😜 🤣

एका वार्ता न अवगता! 🤔 वस्त्रस्य अपक्ववर्णः अन्येषु वस्त्रेषु लिप्त्वा कथं दृढवर्णः भवति? 👕 😜 😂

भवतः गृहं कियत् अपि विशालम् अस्ति, यदि शीतकपाटिकायाम् (फ्रिजस्य) उपरि किमपि वस्तु न स्थापितम्, तर्हि भवान् यथार्थभारतीयः न भवितुं शक्नोति! 😜 😆

# हिमाचलस्य आयुर्विज्ञान-महाविद्यालयेषु प्रारप्स्यन्ते 'उत्कृष्टता-केन्द्राणि गम्भीर-रोगाणाम् उपचारः प्रदेशे एव भविष्यति




## प्रत्येकस्मिन् सर्वकारीय-चिकित्सा-महाविद्यालये द्वौ तः चत्वारः (२-४) विशिष्ट-विभागाः अभिज्ञास्यन्ते

हिमसंस्कृतवार्ता — शिमला।
हिमाचलप्रदेशे गम्भीराणां, जटिलानां, दुर्लभानां च रोगाणाम् उपचारार्थं रुग्णानां बहिर्गमन-बाध्यतां न्यूनीकर्तुं राज्य-सर्वकारेण महती योजना प्रवर्तिता। मुख्यमन्त्रिणः ठाकुर-सुखविन्दरसिंहसुक्खू-महोदयस्य निर्देशैः प्रदेशस्य समेषु सर्वकारीय-आयुर्विज्ञान-महाविद्यालयेषु तथा चमियाणाम्-स्थिते 'अटल-आयुर्विज्ञान-सुपर-स्पेशियलिटी-संस्थाने' (AIMSS) 'उत्कृष्टता-केन्द्राणां' स्थापना-प्रस्तावस्य परीक्षार्थं सम्भावनानां च मूल्याङ्कनाय एकस्याः विशेषज्ञ-समित्याः सङ्घटनम् विहितम्। प्रस्तावितेषु उत्कृष्टता-केन्द्रेषु तादृशानां रोगाणाम् उपचारे विशेषं ध्यानं दास्यते, येषां कृते सामान्य-विभागीय-सेवाभ्यः परं विशिष्ट-ज्ञानस्य, आधुनिकायाः चिकित्सा-प्रविधेः, विशिष्ट-सुविधानां च आवश्यकता भवति। एतेषु केन्द्रेषु विविधाः चिकित्सा-विशेषाः एकस्मिन्नेव मञ्चे संयोज्य रुग्णेभ्यः बहु-विषयीयं (Multi-disciplinary) समुन्नतम् उपचारं कल्पयितुं परिकल्पना विरचिता।
विशेषज्ञ-समितिः प्रदेशस्य प्रत्येके सर्वकारीय-वैद्यकीय-महाविद्यालये चमियाणा-संस्थाने च द्वौ तः चत्वारः तादृशाः विभागाः अभिज्ञास्यति, ये उत्कृष्टता-केन्द्र-रूपेण विकसिताः कर्तुं शक्यन्ते। एतदर्थं संस्थानेषु विद्यमानानां सुविधानां, वैदुष्यस्य, रुग्णानाम् आवश्यकतानां, भावि-सम्भावनानां च गभीरम् अध्ययनं क्रियते। एतेषां केन्द्राणां स्थापनस्य लक्ष्यं केवलम् उत्तम-चिकित्सा-प्रदानम् एव नास्ति, अपि तु आयुर्विज्ञान-शिक्षायाम्, अनुसन्धाने, विशेषज्ञ-प्रशिक्षणे चापि नवीनां दिशां प्रसारयितुम् अस्ति।

## अत्याधुनिक-प्रविधेः तन्त्रज्ञ-चिकित्सकानां च भविष्यति मूल्याङ्कनम्

उत्कृष्टता-केन्द्राणां प्रतिष्ठापनाय केवलं विभागानां चयनं न भविष्यति, अपि तु आवश्यकानां संसाधनानां विस्तृतम् आकलनम् अपि विधास्यते। समितिः अत्याधुनिक-चिकित्सा-प्रविधेः, चिकित्सालय-मूलभूत-संरचनायाः, नूतनोपकरणानां, विशेषज्ञ-चिकित्सकानां, वित्तीय-आवश्यकतानां च अध्ययनं करिष्यति। अस्याः प्रतिवेदनस्य आधारेणैव सुपर-स्पेशियलिटी-स्वास्थ्य-सेवानां संवर्धनाय व्यापकः कार्य-मार्गः सज्जीक्रियते।

### विशेषज्ञ-वैद्यानां दलं करिष्यति निरीक्षणम्

अस्याः विशेषज्ञ-समित्याः अध्यक्षता मण्डी-मण्डलस्य नेरचौक-स्थितायाः अटल-आयुर्विज्ञान-तथा-अनुसन्धान-विश्वविद्यालयायाः (AMRU) कुलपतिना डॉ. डी. के. वर्मा-महोदयेन क्रियते। समित्यां चिकित्सा-शिक्षा-एवं-अनुसन्धान-निदेशकः डॉ. गोपाल-बेरी, टाण्डा-चिकित्सामहाविद्यालयस्य प्रधानाचार्यः डॉ. मिलाप-शर्मा, चमियाणाम्-संस्थानस्य प्रधानाचार्यः डॉ. बृज-शर्मा, आईजीएमसी-शिमलायाः प्राध्यापकः डॉ. बलबीर-वर्मा, तथा आईजीएमसी-शिमलायाः प्राध्यापकः डॉ. पुनीत-महाजनः सदस्याः सन्ति। नेरचौक-वैद्यकीय-महाविद्यालयस्य संयुक्त-निदेशकः अस्याः समित्याः सदस्य-सचिव-रूपेण कार्यं सम्पादयिष्यति। समित्यै सप्ताह-द्वयाभ्यन्तरे स्व-विस्तृत-प्रतिवेदनं समर्पयितुम् आदिष्टम्।

# बाबासाहेब-भीमराव-अम्बेडकर-केन्द्रीय-विश्वविद्यालये विश्व-संस्कृत-मासोत्सवस्य समापन-समारोहः सम्पन्नः

**हिमसंस्कृतवार्ता।** बाबासाहेब-भीमराव-अम्बेडकर-केन्द्रीय-विश्वविद्यालये, लखनऊनगरे, संस्कृत-तथा-वैदिक-अध्ययन-विभागे विभागीय-आचार्यस्य डॉ. बिपिनकुमार-झा-महोदयस्य संयोजने २०२६ तमस्य वर्षस्य सितम्बर-मासस्य चतुर्दशे (१४) दिनाङ्के विश्व-संस्कृत-मासोत्सवस्य (२०२६) समापन-सत्रस्य गरिमामयं भव्यञ्च आयोजनं सम्पन्नम्। अस्मिन् कार्यक्रमे मुख्य-अतिथिरूपेण उत्तर-प्रदेश-न्यायिक-सेवातः माननीय-न्यायाधीशः श्रीशिवेन्द्र-मिश्र-महोदयः समुपस्थितः आसीत्।
कार्यक्रमस्य शुभारम्भः पारम्परिक-दीप-प्रज्वालनेन पुष्पार्चनेन च समभवत्। तदनन्तरं विभागीय-छात्रेण पीयूष-झा-महोदयेन लौकिक-मङ्गलाचरणं प्रस्तुतम्। डॉ. बिपिनकुमार-झा-महोदयेन कार्यक्रमस्य स्वरूपं सविस्तरं प्रतिपादितम्। विभागीय-पक्षतः मुख्य-अतिथये अङ्गवस्त्र स्मृतिचिह्नं च प्रदाय हार्दिकं स्वागतं व्याहृतम्।
विभागाध्यक्षेण प्रो. रिपुसूदन-सिंह-महोदयेन विभागीय-परिचयं समुपस्थाप्य मुख्य-अतिथेः औपचारिकं स्वागतं कृतम्, तथैव विभागस्य विविधाभिः शैक्षणिक-शोध-प्रवृत्तिभिः सद्यःकालीनोपलब्धिभिश्च समुपस्थिताः अतिथयः परिचायिताः। विश्व-संस्कृत-मासोत्सवान्तर्गते आयोजितासु विविधासु प्रतियोगितासु भारतस्य विभिन्नाभ्यः संस्थाभ्यः, यथा-दिल्ली-विश्वविद्यालयात्, सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयात्, दीनदयाल-उपाध्याय-गोरखपुर-विश्वविद्यालयस्य संस्कृत-विभागात्, पाणिनी-संस्कृत-विश्वविद्यालयात् (उज्जयिनी) जगद्गुरु-रामभद्राचार्य- विश्वविद्यालयात् च समागतेभ्यः उत्कृष्ट-प्रदर्शनकारिभ्यः प्रतिभागीभ्यः मुख्य-अतिथेः करकमलाभ्यां पुरस्काराः सम्माननं च प्रदत्तम्। अस्मिन् क्रमे—
**प्रथम-स्थान-भाग्भ्यः** सप्त (७) प्रतिभागीभ्यः पुरस्काराः समर्पिताः, येषु शशाङ्क-झा, विश्वेश्वर-पाण्डेयः, पीयूष-झा, इल्मा, उत्कर्षः, जितेन्द्रः इत्यादयः समाविष्टाः सन्ति।
**द्वितीय-स्थान-भाग्भ्यः** पञ्च (५) प्रतिभागीभ्यः पुरस्काराः प्रदत्ताः, येषु फातिमा, खुशी इत्यादयः प्रमुखाः सन्ति।
**तृतीय-स्थान-भाग्भ्यः**-द्वौ (२) प्रतिभागीभ्यः पुरस्काराः वितीर्णाः, यत्र कीर्तिः इत्यादयः सम्मिलिताः सन्ति।
मुख्य-अतिथिमहोदयेन स्वकीये आशीर्वचने प्रेरणाप्रदे उद्बोधने च छात्रेभ्यः संस्कृतभाषायाः महत्त्वं, वैदिक-ज्ञानपरम्परायाः प्रासङ्गिकतां, समकालीन-शैक्षणिक-परिप्रेक्ष्ये तस्याः उपादेयतां च प्रति सुविस्तृतं मार्गदर्शनं विहितम्।
कार्यक्रमस्य अवसरे लघुनाटिका-प्रतियोगितायां प्रथमस्थानं लब्धवत्याः 'मोहजालात् प्रकृतौ पुनरागमनम्' इति लघुनाटिकायाः दृश्य-श्राव्य-माध्यमेन (चलचित्रेण) प्रदर्शनं कृतम्, यस्य भूरि-भूरि प्रशंसा समुपस्थितैः अतिथिभिः, आचार्यैः, छात्रैश्च कृता।
अस्मिन् अवसरे विभागीय-छात्राणाम् अनुसन्धान-च्छात्राणां च गरिमामयी उपस्थितिः आसीत्, येषु विशेषतः रोहित-सुन्द्रियालः, निधिः, आञ्चल इत्यादयः उपस्थिताः आसन्।
अध्यक्षीय-भाषणे विभागाध्यक्षेण प्रो. रिपुसूदन-सिंह-महोदयेन कार्यक्रमस्य साफल्यनिमित्तं सर्वेषां प्रतिभागिनां, शिक्षकाणां, कर्मचारिणां, संयोजन-समित्याः सदस्यानां च प्रति हार्दिकी कृतज्ञता प्रकटिता। विभागीय-आचार्येण डॉ. रमेशचन्द्र-नैनवाल-महोदयेन मुख्य-अतिथये, अन्येभ्यः विशिष्टातिथिभ्यः, उपस्थितेभ्यश्च जनेभ्यः धन्यवाद-ज्ञापनं विहितम्। अन्ते च सामूहिक-शान्तिमन्त्रेण सह कार्यक्रमस्य विधिवत् समापनम् अभवत्।
समग्रः कार्यक्रमः अतीव सफलः, ज्ञानवर्धकः, प्रेरणादायी च आसीत्, येन छात्रेषु संस्कृतभाषां भारतीयज्ञानपरम्परां च प्रति नूतनस्य उत्साहस्य निष्ठायाश्च सञ्चारः सञ्जातः।

